# ऐतरेयब्राह्मणम्

( सुखप्रदाख्यवृत्ति सहितम् )

# The Aitareyabrāhmaṇa

WITH THE
VṚTTI SUKHAPRADĀ OF
ṢAḌGURUŚIṢYA

राष्ट्रिय-संस्कृत-संस्थानम्

# ऐतरेयब्राह्मणम्

## ( सुखप्रदाख्यवृत्ति सहितम् )

# THE
# AITAREYABRĀHMAṆA

**(WITH THE VṚTTI SUKHAPRADĀ OF ṢAḌGURUŚIṢYA
FROM CHS. 1-32
&
SĀYAṆĀ'S COMMENTARY FROM CHS. 33-40)**

प्रथम भाग

**राष्ट्रिय-संस्कृत-संस्थान**

मानित विश्वविद्यालय
५६-५७, इन्स्टीट्यूशनल एरिया,
जनक पुरी, नई दिल्ली-११००५८

# INTRODUCTION

The Aitareyabrāhmaṇa is one of the collections of the sayings of ancient Brāhmaṇa priests (divines and philosophers illustrative and explanatory of the duties of the so-called Hotṛ-priests. The latter performing the principal part of their duties by means of the mantras, termed *ṛk*, and contained in the so-called Ṛgveda Saṁhitā, the Aitareya is therefore one of the Brāhmaṇas belonging to the Ṛgveda. There must have been, as we may learn from Pāṇini and Patañjali's Mahābhāṣya, a much larger number of Brāhmaṇas belonging to each Veda ; and even Sāyaṇa, who lived only about four hundred years ago, was acquainted with more Brāhmaṇas. To the Ṛgveda we know at present besides the Aitareya, only the Kauśītakī Brāhmaṇa, which is also called Sāṅkhāyana. Both appear to have been known to the grammarian Pāṇini, as one may gather from the rule (v. 1. 62) which he gives regarding the formation of names of Brāhmaṇas consisting of thirty and forty Adhyāyas; for the Kauśītakī actually consists of thirty and the Aitareya of forty Adhyāyas, which were afterwards divided into eight Pañcikās, each of which comprises five Adhyāyas.

It treats in its eight books, or forty chapters, each of which is subdivided into a certain number of *kaṇḍikās*, *i.e.* small sections, paragraphs, almost exclusively of the duties of the seven Hotṛ-priests at the great Soma sacrifices, and the different royal inauguration ceremonies. All minor sacrifices and Iṣṭis, although they require the services of a Hotā, are excluded. The Hotṛ-priests are to be divided into three distinct classes : (1) The *Hotā*, the chief of all Hotṛ-priests; (2) The *Hotrakas*, *i.e.* the little Hotās these are, Maitrāvaruṇa (Prasāstar) Brāmaṇāchaṁsī, and Achhāvāka and (3) The *Hotā-śaaṁsinaḥ*, *i.e.* the repeaters of the Hotṛ verses; they are, Potar, Neṣṭar and Agnidhra.

# प्रथमसंपुटविषयानुक्रमणिका ।


विषयः. पृष्ठम्.

## प्रथमोऽध्यायः ।

मङ्गलाचरणम् १
उपोद्घातः ,,
ऐतरेयमहर्षीतिहासः ४
ऐतरेयमहिदासपदनिर्वचनम् ८
दीक्षणीयेष्टिदेवतास्तवः ९
दीक्षणीयेष्टिविधिः १०
एकादशकपालपुरोडाशविषये चोद्यपरिहारौ १२
प्रसङ्गाद् विष्णुविक्रमणेतिहासकथनम् १३
प्रतिष्ठाकामस्य पुरोडाशस्थाने घृतचर्विष्टिविधिः १४
घृतचर्विष्टिस्तुतिः १५
सोमस्य दर्शपूर्णमासानन्तरकालिकत्वविधिः १६
सामिधेन्यनुवचनविधिः ,,
सामिधेनीसंख्यास्तुतिः १७
इष्टिशब्दनिर्वचनम् १८
आहुतिशब्दनिर्वचनम् १९
होतृशब्दनिर्वचनम् २०
दीक्षितसंस्काराः २१
दीक्षितस्य शालाप्रवेशविधिः २४

विषयः. पृष्ठम्.

उदयास्तमयाश्रावणादिकालेषु दीक्षितस्य बहिर्वेदिगमननिषेधः संस्कारान्तरविधिश्च २५
आज्यभागयोः पुरोनुवाक्याविषये पूर्वपक्षः २८
सिद्धान्तकथनम् ३०
प्रधानहविषो याज्यापुरोनुवाक्याविधिः ,,
याज्यापुरोनुवाक्ययोस्त्रिष्टुप्च्छन्दस्कत्वं तत्प्रशंसा च ३१
कामनाविशेषानुसारेण स्विष्टकृतः छन्दोविशेषयुक्तयाज्यापुरोनुवाक्याविधिः ३२
विराट्शब्दनिर्वचनम् ३७
विराजो नानाच्छन्दोवीर्ययोगप्रदर्शनपूर्वकं प्रशंसा ३८
छन्दसां व्येकाक्षरोनाधिकत्वेऽपि नान्यथात्वम् ३९
स्विष्टकृद्यागे विराट्छन्दसो नित्यत्वेन विधानम् ४०
दीक्षितस्यानृतवचनप्रतिषेधः ४१
सत्यवचनप्रतिनिधितया विचक्षणशब्दयुक्तवाग्वदनविधिः ४२
विचक्षणशब्दस्तुतिः ,,

एवमुत्तरत्रापि ॥

॥ *उष्णिहावायुष्कामः कुर्वीत ॥

स्विष्टकृतः संयाज्ये इत्येव । ते च †'अग्ने वाजस्य गोमतः' इति द्वे ॥

॥ आयुर्वा उष्णिक् ॥

पूर्ववत् ॥

॥ सर्वमायुरेति ॥

यजमानः । सर्वं शताब्दरूपम् ॥

किञ्च,

॥ य एवं विद्वानुष्णिहौ कुरुते ॥

पूर्ववत् ॥

॥ अनुष्टुभौ स्वर्गकामः कुर्वीत ॥

ते च ‡'त्वमग्ने वसून्' इति द्वे ॥

अनुष्टुब्भ्यां कथं स्वर्गप्राप्तिरित्यत उच्यते—

॥ द्वयोर्वा अनुष्टुभोश्चतुष्षष्टिरक्षराणि § ॥

चतुरष्टकत्वादनुष्टुभः ॥

॥ त्रय इम ऊर्ध्वा एकविंशा लोकाः ॥

एकविंशतेः स्वार्थे डे ¶'ति विंशतेर्डिति' । ये त्रय एकविंशास्ते भूखस्वराख्यास्त्रयो लोकाः स्युः । एकविंशस्य प्रतिष्ठात्वश्रुतेर्लोकानां $ च प्रतिष्ठात्वात् ॥

---

* '(उद्हितह्यन्ति ? उत् स्निह्यन्ति) ऊर्ध्वजीविनो भवन्त्यनया इति व्युत्पत्त्या आयुर्वृद्धिहेतुत्वमुष्णिहः' इति भट्टभास्करः. † ऋक्सं० १-५-२७-४. ‡ ऋक्सं० १-३-३१-१. § 'द्वात्रिंशदक्षरानुष्टुब्' २-५-१० इति तैत्तिरीयश्रुतिः. ¶ पा० सू० ६-४-१४२. $ 'एकविंशतिमनुब्रूयात् प्रतिष्ठाकामस्य' २-५-१० इति तैत्तिरीयश्रुतिः.

# ऐतरेयब्राह्मणम्

( सुखप्रदाख्यवृत्ति सहितम् )

# The Aitareyabrāhmaṇa

WITH THE
VṚTTI SUKHAPRADĀ OF
ṢAḌGURUŚIṢYA

राष्ट्रिय-संस्कृत-संस्थानम्

# ऐतरेयब्राह्मणम्

( सुखप्रदाख्यवृत्ति सहितम् )

# THE AITAREYABRĀHMAṆA

(WITH THE VṚTTI SUKHAPRADĀ OF ṢAḌGURUŚIṢYA
FROM CHS. 1-32
&
SĀYAṆA'S COMMENTARY FROM CHS. 33-40)

द्वितीय भाग

राष्ट्रिय-संस्कृत-संस्थान
मानित विश्वविद्यालय
५६-५७, इन्स्टीट्यूशनल एरिया,
जनक पुरी, नई दिल्ली-११००५८

# विषयानुक्रमणी

## षोडशोऽध्यायः ।


| विषयः | पार्श्वम् |
|---|---|
| षोडश्यर्थ इतिहासः | १ |
| पृष्ठ्यषळहस्य चतुर्थेऽहनि षोडशिशंसनविधिः | २ |
| षोडशिप्रशंसा | ,, |
| उक्थानां परस्तात् षोडशिशंसनविधिः | ३ |
| चोद्यपरिहाराभ्यां षोडशिशब्दप्रवृत्तिनिमित्तकथनम् | ४ |
| षोडशिशस्त्रनिष्पादकगौरिवीतनानदाख्यसामविधिः | ६ |
| नानदनामनिर्वचनार्थेतिहासः | ,, |
| नानदशब्दनिरुक्तिः | ७ |
| सामापेक्षया षोडशिशंसनप्रकारकथनम् | ,, |
| छन्दोविहरणविधिः, तत्प्रकारश्च | ८ |
| अतिच्छन्दसां कासांचिदृचां शंसनविधिः | १४ |
| अतिच्छन्दःशब्दनिर्वचनम् | १५ |
| अतिच्छन्दसामृचामनुष्टुप्त्वसम्पादनार्थं महानाम्नीनामकानामृचामुपसर्गसंयोजनविधिः | ,, |
| महानाम्नीप्रशंसा | १७ |
| प्र प्रव इत्यादीनां स्वत एवानुष्टुभामृचां शंसनविधिः | १८ |
| अधिकार्यपेक्षया शस्त्रशंसनव्यवस्था | १९ |
| शस्त्रयाज्याविधिः | २१ |
| शस्त्रयाज्याया अनुष्टुप्त्वसम्पादनार्थं पुरीषपदसंज्ञकपञ्चाक्षरोपसर्गसंयोजनविधिः | २२ |
| अतिरात्रसंस्थार्थ इतिहासः | २३ |
| पर्यायनामनिर्वचनम् | २५ |
| छन्दसामपिशर्वरनाम्ना व्यवहारे हेतुः | २६ |
| अपिशर्वरनामनिर्वचनम् | २७ |
| चतुरशस्त्रेषु पर्यायेषु प्रथमपर्याये होतुः शस्त्रविधिः | ,, |
| अथ त्रिष्वपि पर्यायेषु शस्त्रयाज्याविधिः प्रयोगश्च | २८ |
| रात्रौ पवमानान्वयाभावादहोरात्रयोः पवमानवत्त्वेन तुल्यत्वे चोद्यपरिहारौ | ३० |
| तथा रात्रौ पञ्चदशस्तोत्राभावात् पञ्चदशस्तोत्रवत्त्वेनाहोरात्रयोः साम्ये चोद्यपरिहारौ | ,, |

अर्वाक् ऊनम् । यद् यदि ।
सहस्रत्वं यदि न्यूनं नैतत् खल्वाश्विनं भवेत् ॥

॥ तस्माच्चत् सहस्रं वैव शंसेद् भूयो वा ॥

भूयो बहुतरम् । तच्च,

॥ प्राश्य घृतं शंसेत् ॥

¶ 'अग्निरज्वी'तिषड्ढोमपरिशिष्टं तु यद् घृतम् ।
* पीत्वानाचम्य तच्छंसेच्छस्त्रमाश्विनमञ्जसा ।
† 'संस्थितेष्वाश्विने'त्यादि सूत्रस्यार्थोऽत्र गृह्यताम् ॥

स्तौति—

॥ यथा ह वा इदमनो वा रथो वाक्तो वर्तेत एवं हैवाक्तो वर्तते ॥

‡ इदं ह्यर्थे सु, अस्मिन् लोके । अनः शकटम् । अक्ताक्षो रथो वा ।
आज्यसंरक्तकण्ठ(त्वाच्छं?स्तु शं)सन् वर्तेत (ये? यत्) सुखम् ।

किञ्च,

॥ शकुनिरिवोत्पतिष्यन्नाह्वयीत ॥

शोंसावोमित्युक्तिकाले पतिष्यन् खगवद् भवेत् ।
आह्वयेदिति तु प्राप्ते छन्दस्त्वादाह्वयीत वै ।
§ 'सूत्रे समस्तजङ्घे'ति त्वस्य लक्षणमिष्यताम् ॥

---

¶ आ० श्रौ० सू० ६. ५. २. * 'प्राश्याज्यशेषमप उपस्पृश्याचामेत्' आ० श्रौ० सू० ६. ५. ३. † आ० श्रौ० सू० ६. ५. १. ‡ 'यथा लोके किञ्चिदिदं निदर्शनं तद्वत्' इति सायणः । § आ० श्रौ० सू० ६. ७. ४.

# ऐतरेयब्राह्मणम्

( सुखप्रदाख्यवृत्ति सहितम् )

# The Aitareyabrāhmaṇa

**WITH THE VṚTTI SUKHAPRADĀ OF ṢAḌGURUŚIṢYA**

राष्ट्रिय-संस्कृत-संस्थानम्

## षड्विंशोऽध्यायः ।


| विषयः | पार्श्वम् |
|---|---|
| अग्निष्टोमे ग्रावस्तुत्कार्यविधानार्थे इतिहासः | १ |
| ग्रावाभिष्टवकालविधिः | ३ |
| अभिष्टवकाले दृष्टिदोषपरिहारार्थम् उष्णीषेण ग्रावस्तुतो नेत्रवेष्टन-विधिः | ४ |
| सूक्तगतोग्रत्वशान्त्यर्थम् अर्बुदसूक्त-स्यान्याभी ऋग्भिः सम्मिश्रणम् | ५ |
| पक्षान्तरप्रदर्शनपुरस्सरं ग्रावस्तोत्रस्य ऋक्संख्याव्यवस्थापनम् | ६ |
| मतान्तरेषु दोषप्रदर्शनपूर्वकम् अभिष्टवे अर्धर्चपक्षस्यैव व्यव-स्थापनम् | ८ |
| प्रश्नोत्तरमुखेन अभिष्टवस्य सवन-त्रयसङ्गतत्वप्रतिपादनम् | १० |
| प्रश्नोत्तरमुखेन ग्रावस्तुतः सम्प्रैष-निरपेक्षत्वकथनम् | ११ |
| सुब्रह्मण्याशब्दार्थः | ,, |
| सुब्रह्मण्याकार्यनिरूपणम् | १२ |
| सुब्रह्मण्याशब्दनिर्वचनम् | १३ |
| सुब्रह्मण्येति स्त्रीत्वेन निर्देशस्य समर्थनम् | ,, |
| सुब्रह्मण्याह्वानस्य देशविधिः | ,, |
| अत्रार्थे इतिहासः | १४ |
| सुब्रह्मण्याख्यर्त्विजः दक्षिणात्वेन वृषभदानविधिः | ,, |
| आग्नीध्रकार्यप्रतिपादनम् | १५ |
| पात्नीवतग्रहेऽनुवषट्कारनिषेधः | १६ |
| पात्नीवतग्रहभक्षणे देशविधिः | १६ |
| सुब्रह्मण्याविषये विशेषकथनम् | १७ |


---

## सप्तविंशोऽध्यायः ।


| विषय. | पार्श्वम् |
|---|---|
| प्रशास्तृब्राह्मणाच्छंस्यच्छावाकानां शस्त्रविधानार्थं इतिहासः | १८ |
| मैत्रावरुणादीनां शस्त्रविधिः | १९ |
| प्रातस्सवन एव स्तोत्रियानुरूपौ नान्ययोः सवनयोरिति कथनम् | २३ |
| मैत्रावरुणादीनाम् आरम्भणीया-ख्यर्ग्विधिः | २५ |
| परिधानीयानां ऋचां विधिः | २७ |
| प्रातर्मध्यन्दिनयोः परिधानीयाया द्विप्रकारत्वम् | ३१ |
| मैत्रावरुणादीनां परिधानीया-विशेषकथनम् | ,, |
| तृतीयसवने होत्रकाणां परिधानीयाकथनम् | ३३ |
| प्रातस्सवने याज्यानुवाक्याना-मानवान्यकथनम् | ३४ |
| प्रातस्सवने स्तोमशंसने नियमः | ,, |
| उत्तरसवनयोः स्तोमशंसने नियमः | ३५ |
| अतिशंसने विशेषकथनम् | ३६ |


---

## अष्टाविंशोऽध्यायः ।


| | |
|---|---|
| प्रातःसवने प्रशास्तुः 'आत्वे'त्युचीय-मानसूक्तशंसनविधिः | ३८ |

॥ अथैतदधीनात्वं शुक्रियं छन्दो यत्त्रिष्टुप् ॥

अमृतनाम्नः शुक्रात् स्वार्थे घञ् ।

त्रिष्टुब्नाम तु यच्छन्दः शुक्रियं ह्यमृतात्मकम् ॥

एतच्च त्रिष्टुप्त्वं,

॥ सवनस्य सरसताया इति ब्रूयात् ॥

(स्यात् ?) चोदकं प्रति ।

॥ अथो इन्द्रमेवैतत् सवनेऽन्वाभजतीति ॥

अथो अपिच । एतत् त्रिष्टुक्; एतस्मिन्नपि सवने । आभजति । स्थापयति । अनु सुष्ठु । इति एवम् ।

॥ अथाह यदैन्द्रार्भवं वै तृतीयसवनमथ कस्मादेक एव तृतीय-सवने प्रस्थितानां प्रत्यक्षादैन्द्रार्भव्या यजतीन्द्र ऋभुभिर्वाज-वद्भिः समुक्षितमिति होतैव नानादेवत्याभिरितरे कथं तेषामैन्द्रा-र्भव्यो भवन्तीति ॥

यद् यदि प्रत्यक्षात् प्रत्यक्षेण । होतैक एवेन्द्र ऋभुभिरिति यजति नान्ये यद् । तेषां कथमैन्द्रार्भव्यः स्युरिति ।

परिहरति —

॥ *इन्द्रावरुणा सुतपाविमं सुतमिति मैत्रावरुणो यजति ॥

१. 'यद्' ख. ङ. पाठः. २. 'ति । अनु' ग. पाठः.

* ऋग्स० ५. १, १२. ७.